Register Number:

Date:

**ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27**

**B.A.** B.SC. **SANSKRIT - II SEMESTER**

**SEMESTER EXAMINATION: APRIL 2019**

SA **218 – SANSKRIT**

**Time - 2 1/2 hrs** **Max Marks - 70**

I. दशानां प्रश्नानाम् एकवाक्येन संस्कृतभाषायाम् उत्तरं लिखत। 10×1=10

अ) दिलीपस्य आचार्यः कः?

आ) शिवस्य भिक्षया का खिन्ना अस्ति?

इ) 'काश्चित्' इति कीदृशं पदम्?

ई) गुरुः कौत्सं कां गुरुदक्षिणां पृष्टवान्?

उ) सीता कस्य आश्रमे लवकुशौ प्रसूतवती?

ऊ) कैकेयी कीदृशान् वरान् अयाचत?

ऋ) रघुः किं कर्तुं सङ्कल्पितवान्?

ॠ) दशरथः दूरात् कं शब्दं श्रुतवान्?

लृ) इन्द्रः कस्याः अनुग्रहेण दृष्टः?

ए) "चत्वारः बालिकाः" इति वाक्यं शुद्धं वा न वा?

ऐ) रघुवंशे कति सर्गाः सन्ति?

ओ) दिलीपस्य कति यागाः निर्विघ्नाः जाताः?

II. आङ्लभाषायाम् अर्थं लिखत। 5×1=5

2. ह्रदः

क. कुण्डलिका

ख. अन्त्रम्

ग. मेखला

घ. पल्वलम्

ङ. प्रावारकम्

III. सन्धिं विभज्य अथवा संयोज्य नाम लिखत 5×1=5

3. देवौ + इति

च. इत्यसि

छ. राजा + ऐश्वर्यम्

ज. गङ्गौघः

झ. जननी + अवदत्

ञ. कटयुपविशति

IV. श्लोकस्य अन्वयम् अन्वयार्थं तात्पर्यं च लिखत। 2×5=10

4. स्वभावं न जहात्येव साधुरापद्गतोऽपि सन्।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम्॥

5. धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति॥

6. व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम्।
आयुः परिस्रवति भिन्नघटादिवाम्भः
लोकस्तथाप्यहितमाचरतीति चित्रम्॥

V. एतासां पङ्क्तीनाम् अर्थं वर्णयत 5×2=10

7. प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्।

8. सीताप्यनुगता रामं शशिनं रोहिणी यथा।

9. तस्य तदेव मधुरं यस्य मनो यत्र संलग्नम्।

10. पितुर्वचननिर्देशात् कैकेय्या: प्रियकारणात्।

11. गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।

12. बहुविघ्नास्तु सदा कल्याणसिद्धयः।

VI. सविस्तरं लिखत 1×10=10

13. सिंहदिलीपयोः संवादं विशदयत।

14. श्लोकसहितं रघुवंशमधिकृत्य लिखत।

VII. अधोलिखितम् अनुच्छेदं पठित्वा उत्तरं लिखत ।

भारतवर्षे षड् ऋतवः भवन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तस्य ऋतुः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः – वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमोदो भवति। नराः नार्यः च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां मन्यते। हर्षातिरेकेण नराः, नार्यः, युवानः, वृद्धाः, बालकाः, च प्रसन्नाः जायन्ते। जनाः परस्परं रक्तवर्णं रक्तचूर्णं च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति। रात्रौ जनाः परस्परम् आमन्त्र्य प्रीतिभोजं कृत्वा आमोदं मानयन्ति। वार्तालापस्य माध्यमेन सर्वे जनाः मिलित्वा स्वजीवनं कुर्वन्ति।

पूर्णवाक्येन लिखत 4×1 = 4

15. भारते कति ऋतवः भवन्ति?

ट. होलिकोत्सवः कस्यां तिथौ मन्यते?

ठ. होलिकोत्सवे नराः नार्यः च किं कुर्वन्ति?

ड. वार्तालापस्य माध्यमेन सेर्वे जनाः किं कुर्वन्ति?

16. भाषिककार्यम् 4×1 = 4

ढ. 'ऋतुराजः' इति कस्य पदस्य विशेषणम्?

१) वसन्तः २) वैशाखः ३) चैत्रः ४) फाल्गुनः

ण. 'हर्षातिरेकेण _________ प्रसन्नाः जायन्ते।' उचितं चित्वा वाक्यं पूरयत

१) नराः २) महिलाः ३) सर्वे ४) जनाः

त. 'प्रक्षिपन्ति' इति क्रियायाः कर्तृपदं किम्?

१) जनाः २) बालकाः ३) कन्याः ४) नार्यः

थ. 'भारतवर्षे षड् ऋतवः भवन्ति।' अत्र क्रियापदं किम्?

१) षट् २) भवन्ति ३) ऋतवः ४) भारते

द). उपर्युक्तस्य परिच्छेदस्य समुचितशीर्षकं लिखत 2

VIII. संस्कृते अनुवादं कुरुत 10

Gopalakrishna Gokhale was a real patriot. He loved India, His desire was to help his country to became great. His life very simple and unselfish. He cared neither money nor fame. His ambition was to do his duty. He won fame as a speaker. But above all he was a Karmayohi. He never believed in mear words. He wanted to complete the works undertaken.